५२—बाह्वादि—बाहु । उपबाहु । निवाकु । शिवाकु । घटाकु । उपबिन्दु । वृक । चूडाला । मूषिका । बलाका । भगला । छगला । ध्रुवका । धुवका । सुमित्रा । दुर्मित्रा । पुष्करसत् । अनुहरत् । देवशर्मन् । अग्निशर्मन् । धुनामन् । सुनामन् । पथ्यन् । सप्तन् । अष्टन् ॥ अमितौजसः सलोपश्च (३)॥ उदश्वु । शिरम् । शरविन् । क्षेमवृद्धिन् । शङ्खलातोदिन् । खरनादिन् । नगरमर्दिन् । प्राकार-मर्दिन् । लोमन् । अजीगर्त । कृष्ण । सलक । युधिष्ठिर । अर्जुन । साम्य । गद । प्रद्युम्न । राम ॥ उदङ्कः संज्ञायाम् ॥ सम्भूयोऽम्भसोः सलोपश्च (४) ॥ निवाकु । अवाकु । विन्दु । चूडा । वृकला । भद्रशर्मन् । सुशर्मन् । सुधावन् । माप । आकृतिगणोऽयम् (५) ॥ इति बाह्वादयः ॥

---

(१) अत्र सत् शब्दाग्रहणे-सत्वन, तु, अग्रयम् । सात्वतोऽत्रयं सात्वताः ॥

(२) अत्र छन् शब्देन वृत्तं गृह्यते, न तु वेदः । सतोऽग्र आज ॥

(३) अमितौजसोऽपत्यमामितौजिः ॥

(४) सम्भूयसोऽपत्यं साम्भूयिः । आग्निः ॥

(५) गुरुपधेन चकारेणाप्राऽऽकृतिगणत्वं द्योत्यते । तेन आग्निः, श्येनजामिः, आग्नेयेनविः, आग्नवेश्यादिः, औद्दालोमिः । इत्यादिसिद्धो भवति ॥

५०—गोत्रे कुञ्जादिभ्यश्चफञ् ॥ अ० ४ । १ । ९८ ॥

गोत्रसञ्ज्ञकेऽपत्ये वाच्ये कुञ्जादिभ्यश्चफञ् प्रत्ययो भवति। इत्यपवादः। कुञ्जस्य गोत्रापत्यं कौञ्चायन्य', कौञ्चायन्यौ, कौञ्चायना.। स्वार्थे व्यक्तस्य तद्राजत्वाद् बहुषु लुक्। गोत्र इति किम्—कुञ्जस्यानन्तरापत्यं कौञ्जि.।

५२—कुञ्जादि—कुञ्ज। ग्रध्न। शङ्ख। भस्मन्। गण लोमन्। जठ। शाक। शाकट। शुण्डा। शुभ। विपाश। स्कन्द। स्कम्भ। शुम्भा। शिव। शुभंया। इति कुञ्जादय.॥

५१—नडादिभ्यः फक् ॥ अ० ४ । १ । ९९ ॥

नडादिप्रातिपादिकेभ्यो गोत्रापत्ये फक् प्रत्ययो भवति। नडस्य गोत्रापत्यं नाडायन, चारायणः।

५४—नडादि—नड। चर। धक। मुञ्ज। इतिक। इतिश। उपक। लमक॥ शलङ्कु शलङ्कश्च (१)॥ सप्तल। वाजप्य। तिक। अग्निशर्मन् वृषगणे॥ गण। नर। सायक। दास। मित्र। द्वीप। पिङ्गर। पिङ्गल। किङ्कर। किङ्कल। कातर। कातल। काश्य। काश्यप। काव्य। अज। अमुष्य॥ कृष्णरणौ ब्राह्मणवासिष्ठयोः (२)॥ अमित्र। लिगु। चित्र। कुमार॥ क्रोष्टु क्रोष्टश्च (३)॥ लोह। दुर्ग। स्तम्भ। शिशपा। अप। तृण। शकट। सुमनस्। सुमत। मिमत। ऋक्। जन्। युग-धर। हसक। दण्डिन्। हस्तिन्। पञ्चाल। चमसिन्। सुकृत्य। स्थिरक। ब्राह्मण। चटक। बदर। अश्वक। खरप। कामुक। ब्रह्मदत्त। उदुम्बर। शोण। अलोह।

(१) शलङ्कुशब्दस्य शलङ्कादेश। शलङ्कोरपत्यं शालङ्कायनः॥
(२) कृष्णस्यापत्यं काण्वायनो ब्राह्मण', राणायनो वासिष्ठः॥
(३) क्रोष्टोरपत्यं क्रौष्टः॥

दण्ड । एक । धानञ्य । शावक । नाञ्य । अन्वजत् । अन्तजन । इत्वरा । अंशक । अश्वला । अध्वर । दण्डप । इति नडादय' ॥

५२—अनृष्यानन्तर्ये विदादिभ्योऽञ् ॥अ०४।१।१०४॥

विदादिभ्यो गोत्रापत्येऽञ् प्रत्ययो भवति । येऽत्र गणेऽनृषिवाचकास्तभ्यस्त्वनन्तरापत्य एव । विदस्य गोत्रापत्यं वैद । पुत्रस्यानन्तरापत्यं पौत्र', दौहित्र ।

५५—विदादि—विद । उर्व । कश्यप । कुशिक । भरद्वाज । उपमन्यु । किलालप । निर्ऋति । विभानर । ऋष्टिषेण । ऋषभाग । हर्यश्व । प्रियङ्ग । आपस्तम्ब । कूचवार । शारद्वत । शुनक । धेनु । गोपवन । शिम्बु । विन्दु । भाजन । अश्वावतान । श्यामाक । श्यमाक । श्यापर्ण । हरित । किन्दास । यज्ञक । अर्कदूष । वध्योष । विष्णु वृद्ध । प्रतिबोध । रथन्तर । रथीतर । गविष्ठिर । निषद । मठर । मृद । पुलभू । पुत्र । दुर्दिन । ननान्द ॥ पञ्चाल पशुषु (१) ॥ किलाल । मध्यक । शाबली । श्यावक । अलम । इति विदादय ॥

वन्तु । मनार्थी । मूत । कथक । कप । तण्ड । वतण्ड । कपि । कत ।
शुकृत । अनड्वह् । कण्व । शकल । गोकक्ष । अगस्त्य । कुण्डिन ।
याज्ञवल्क । उभय । जात । विरोहित । वृषगण । रहूगण । शण्डिल ।
चण । कचुल्लक । मुद्गल । मुसल । पराशर । जतूकर्ण । मन्त्रित ।
सहित । अश्मरथ । शर्कराक्ष । पूतिमाष । स्थूण । अररक । पिङ्गल ।
कृष्ण । गोलुन्द । उलूक । तितिक्ष । भिषज् । भण्डित । भण्डित ।
दर्भ । चिक्षित । दनदू । इन्द्रहू । एकलू । पिप्पलू । बृहदग्नि ।
जमदग्नि । सुलोमिन् । न्यङ्क्ष । शुदीगु । इति गर्गादय ॥

४५—अश्वादिभ्य. फञ् ॥ अ० ४ । १ । ११० ॥

अश्वादिभ्यो गोत्रापत्ये फञ् प्रत्ययो भवति । आश्वायन*, आरमायन । येऽस्मिन् गणेऽपत्यप्रत्ययान्ता पठ्यन्ते तेषु सामर्थ्या-च्चूनि प्रत्ययो विज्ञायते ।

५७—अश्वादि—अश्व । अश्मन् । शङ्ख । विद । पुट । रोहिण । खर्जूर । खर्जूल । पिञ्जूर । भडिल । भण्डिल । भडित । भण्डित । भण्डिक । प्रहव । रामाद । क्षत्र । ग्रीवा । काश्य । गोलाङ्गूल । अर्क । स्वन । धवन । पाल । चक्र । कुल । पवित्र । गोमिन् । श्याम । धूम । धूम्र । यागिमन् । विश्वानर । कुट । वेश । आत्रेय । नक्त । तड । नड । ग्रीष्म । अर्ह । विश्रम्य । विशाला । गिरि । चपल । चुनम । दासक । चैत्य । घर्म । आनडुह्य । पुसिजात । अर्जुन । शुद्रक । सुमनस् । दुर्मनस् । क्षान्त । प्राच्य । कित । काण । चुम्प । श्रविष्ठा । वीर्य । पविन्दा ॥ आत्रेय, भारद्वाजे ॥ शुल्स । आतव । कितव । शिव । खदिर ॥ भरद्वाज आत्रेये (१) ॥ पथ । कन्यु । ध्रुव । सूनु । चर्कटक । रक्त । तक्र । तलुक्ष । प्रचुल । विलम्ब । विष्णुज । इत्यश्वादय* ॥

(१) आत्रेयशब्दाद् भारद्वाजगोत्रे फञ् । आत्रेयायणो भारद्वाज । अ रद्वाजशब्दादात्रेयगोत्रे फञ् । भारद्वाजायन आत्रेय ॥

५५–शिवादिभ्योऽण् ॥ अ० ४ । १ । ११२ ॥

शिवादिभ्य समान्यापत्येऽण् प्रत्ययो भवति । यथाप्राप्तानभिन्नादीनामणपवादानां च बाधकः । शिवस्यापत्यं शैवः ।

५८—शिवादि—शिव । शौष्ठ । शौष्ठिक । चण्ड । मण्ड । जम्भ । भाण्ड । मुनि । सन्धि । भूरि । कुठार । अनभिम्लान । अनभिग्लान । ककुत्स्थ । कहोड । लेख । रोध । खञ्जन । कोहड । पिष्ट । हेहय । खञ्जार । खञ्जाल । सुरोहिका । पर्ण । कहूप । परिल । वतण्ड । तृण । कर्ण । क्षीरहद । जलहद । परिपिक । जटिलिक । गोफिलिक । बधिरिका । मञ्जीरक । घृष्णिक । रेख । आलेखन । विश्रवण । स्रवण । वर्तनाक्ष । पिटक । पिटाक । वृक्षाक । नभाक । ऊर्णनाभ । जरत्कारु । उत्क्षिपा । गोहितिक । आर्यत । सुपिष्ट । खर्जूरकर्ण । मसूरकर्ण । तूनकर्ण । मयूरकर्ण । खडरक । वक्षन् । ऋष्टिषेण । गङ्गा । विपाशा । यस्क । लह्य । दुघ । अयस्थूण । भलन्दन । विरूपाक्ष । भूमि । इला । सपत्न ॥ द्वयचो नद्याः ॥ त्रिवेणी, त्रिवण च (१) ॥ कह्वय । कपोध । परल । ग्रीवाद । गोभिलिक । राजल । वडाक । षडाक । इति शिवादय ॥

५६–शुभ्रादिभ्यश्च ॥ अ० ४ । १ । १२३ ॥

शुभ्रादिप्रातिपदिकेभ्योऽपत्ये ढक् प्रत्ययो भवति । यथाप्राप्तमिञादीनामपवादः । शुभ्रस्यापत्य शौभ्रेय ।

५९—शुभ्रादि—शुभ्र । विष्टपुर । मन्मथन । शतद्वार । शलाकर । शलाका । शालाचल । शलाकाभ्र । लेखाभ्र । विमातृ । विधवा । पृक्कसा । रोहिणी । रुक्मिणी । दिशा । शौल्वक । अज-

(१) कीवापवादः "द्वयच" (सू० २०१) इति सूत्रेण ढक् प्राप्त स नदीवाचकस्यामात् । रेवाया अपाय रैवः । त्रिवेण्यादित्वगादेशो विशेषः । त्रिवेण्या अपत्यं त्रैवण. ॥

वस्ति । शकन्धि । लक्षणश्यामयोर्वसिष्ठे (१) ॥ गोधा । कृकलास । अर्णीव । प्रवाहण । भरत । मारत । भागम । मृकण्डु । मधण्डु । मकण्डु । कर्पूर । इतर । अन्यतर । आलीढ । सुदत्त । सुचक्षस । सुनामन् । कटु । तुद । अकशाप । कुमारिका । किशोरिका । कुवे-णिका । जिह्माशिन । परिधि । वायुदत्त । ककल । खदूर । अम्बिका । अशोका । शुद्धपिङ्गला । खडान्मत्ता । अनुवृष्टि । जरतिन् । वलिवर्दिन् । विमल । ओज । स्वन् । अरमन् । अश्व । अजिर । स्थूल । सकण्डु । मकथु । यमण्डु । कण्डु । सुकण्ड । मृकण्ड । गुद । रुद । कुशेशिका । शकल । शमल । धम्र । अजिन । इति शुभ्रादय ॥

५७—कल्याण्यादीनामिनङ् ॥ अ० ४ । १ । १२६ ॥

कल्याण्यादिप्रातिपदिकेभ्योऽपत्ये ढक् प्रत्ययो भवति तस्मिन् सति इनङादेश. । कन्याण्या अपत्यं कात्यायिनेय, सौभागिनेय* (२) ॥

६०—कल्याण्यादि—कल्याणी । सुभगा । दुर्भगा । बन्धकी । अनुवृष्टि । अनुसृष्टि । जरती । वलीवर्दी । ज्येष्ठा । कनिष्ठा मध्यमा । परस्त्री । इति कल्याण्यादय ॥

५८—गृष्ट्यादिभ्यश्च ॥ अ० ४ । १ । १३६ ॥

गृष्ट्यादिप्रातिपदिकेभ्योऽपत्ये ढक् प्रत्ययो भवति । अणादीनामपवाद । गृष्टेरपत्यं गार्ष्टेय ॥

---

(१) लक्षणस्यापत्य लाक्षणयो वसिष्ठ । श्यामाया अपत्यं श्यामेयो वासिष्ठः । मातुर्नामधेयात् श्यामाशब्दादण् प्राप्त सोऽनेन बाध्यते ॥

(२) कल्याण्यादिभ्यो ढक् तु सिद्धः, आदेशार्थं वचनम् 'इञ-सिञ्सनो' (पै० २०७) इत्युभयपदवृद्धिः ॥

६१—गृष्ट्यादि—गृष्टि। हृष्टि। हलि। बलि। विश्रि। क्षुद्रि। अजशस्ति। मित्रयु। फलि। अलि। दृष्टि। इति गृष्ट्यादय ॥

५९—रैवत्यादिभ्यष्ठक् ॥ अ० ४। १। १४६ ॥

रैवत्यादिभ्योऽपत्ये ठक प्रत्ययो भवति। ठगादीनामपवादः। रैवत्या अपत्य रैवतिक ॥

६२—रैवत्यादि—रैवती। अश्वपाली। मणिपाली। द्वारपाली। यूकवच्चिन्। वृकग्राह। कर्णग्रह। दण्डग्राह। कुक्कुटाक्ष। यूकबन्धु। चामरग्राह। कटुदाक्ष। इति रवत्यादय ॥

६०—कुर्वादिभ्यो ण्यः ॥ अ० ४। १। १५१ ॥

कुर्वादिप्रातिपदिकेभ्योऽपत्ये ण्य प्रत्ययो भवति। कुरोरपत्य कौरव्य, काव्य ×।

६३—कुर्वादि—कुरु। गर्ग। मद्गु। अजमारक। रथकार। वायदूक। सम्राज क्षत्रिये (१)। कवि। मति। वाक्। पितृमत्। इन्द्रजालि। दामोष्णीषि। गणकारि। कैशारि। कापिञ्जलादि। कुट। शलाका। मुर। एरक। अभ्र। दभ। केशिनी। वेनाच्छन्दसि॥ शूर्पणाय। श्यावनाय। श्यावरथ। श्यावपुत्र। सत्यकार। वडभीकार। शङ्कु। शाक। पथिकारिन्। मूढ। शकन्धु। कटृ। हटृ। शाकिन्। इनपिण्डी। विस्फोटक। काक। स्फाण्टक। शाकिन्। घातकि। धेनुजि। घुट्टिकार ॥ वामरथस्य कण्वादिवत् स्वरवर्जम् (२) ॥ इति कुर्वादय ॥

---

(१) सम्राट् शब्दात् क्षत्रिये वाच्ये ण्यो भवति, सम्राजोऽपत्य साम्राज्य क्षत्रिय ॥ × ऋविशब्दोऽत्र पठते, तस्मात्। यु० मी०

(२) वामरथशब्दाण्ण्यप्रत्ययो भवति कण्वादिवच्च स्वरवर्जं कार्यमेतिदिश्यते। कण्वादयो गर्गाद्यन्तर्गतास्तेभ्य शैषिकोऽण् यथा काण्वस्य छात्राः काण्वा एव वामरथादपि शैषिकोऽण् वामरथस्य छात्रा

६१-तिकादिभ्यः फिञ् ॥ अ० ४ । १ । १५४ ॥

तिकादिभ्यः प्रातिपदिकेभ्योऽपत्ये फिञ् प्रत्ययो भवति । तिकस्यापत्यं तैकायनिः, कैतवायनि. ॥

६४—तिकादि—तिक । कितव । संज्ञा । पाल । शिखा । वरस् । शाट्य । मैन्यव । यमुन्द । रूप्य । प्राप्य । नील । अमित्र । औदक्ष्य । कुल । देवरथ । तैतिल । आंरस । कौरव्य । औरिकि । औलिकि । चौपयति । चैटयत्र । शौकयत । कैवयत्र । आजमत । चन्द्रमस् । शुभ । गङ्गा । धरेणय । सुयामन् । आर्द्र । घण्टका । स्वन्य । यूप (१) । लोमक । पदन्य । यज्ञ । आर्य । मीत । जाजल । रस । लायक । अजवद । वसु । बन्धु । आमन्यका । सुयामन् । इति तिकादय. ॥

६२-याकिनादीना कुक् च ॥ अ० ४ । १ । १५८ ॥

याकिनादिगणेभ्योऽपत्ये फिञ् प्रत्ययो भवति । तत्सन्नियोगेन चैषां कुगागमः । याकिनस्यापत्यं याकिनकायनिः ॥

६५—याकिनादि—याकिन । गार्ग्य । कार्ष्टव । फाक । लङ्का ॥ चर्मिवर्मिणोर्नलोपश्च (२) ॥ इति याकिनादय ॥

६३-वा०—कम्बोजादिभ्यो लुग्वचनम् ॥ अ० ४ । १ । १७५ ॥

कामरथाः । बहुवर्चे मन्त्रेऽन्यत्रापि लुक् । कामरथा । 'कामय' (उ० ३०) इति थेन् कामरथी, स्वरकालोदात्त एव ॥

(१) फिञ् प्रत्ययान्तेऽपि लुगन्तस्य यथाकालं सकामार्थे • वृषल् । वृषलकाण्डे कार्षलायनिः ।

(२) चर्मंकायनि , चर्मिकायनिः ॥

• फिञ् प्रत्ययेन बहुवचनान्तस्यापि लुक् च (वै० २७०) इति वार्षिकं तदपि भाष्ये नास्ति प्रत्युत

कम्बोजादिशब्देभ्योऽपत्ये तद्राज'न विहितस्य लुग्भवति । कम्बोजस्यापत्य तद्राजो वा कम्बाज ।

६६—कम्बोजादि—कम्बोज । चोल । केरल । शक । यवन । इति कम्बोजादयः ॥

६४—न प्राच्यभर्गादियौधेयादिभ्यः ॥अ०४।१।१७८॥

प्राच्यक्षत्रियवाचकेभ्यो भर्गादिभ्यो यौधेयादिभ्यश्चोत्पन्नस्य तद्राजप्रत्ययस्य लुड् न भवति । "अतश्च" इति प्राप्त प्रतिषिध्यत । प्राच्य—पञ्चालाना राज्ञां पाञ्चाली, वैदेही; भार्गी; यौधेयी ।

६७—भर्गादि—भर्ग । करूष । केकय । कश्मीर । साल्व । थाल । उशीनर (चरक) । कौरव्य । इति भर्गादय. ।

६८—यौधेयादि—यौधेय । शौभ्रेय । शौक्लेय । प्रावाणेय । वार्तेय । धार्तेय । त्रिगर्त । भरत । उशीनर । इति यौधेयादय ॥

६५—भिक्षादिभ्योऽण् ॥ अ० ४ । २ । ३८ ॥

षष्ठीसमर्थभिक्षादिशब्देभ्य. समूहार्थेऽण् प्रत्ययो भवति । अञादिबाधनार्थमणग्रहणम् । भिक्षाणा समूहो भैक्षम्, गार्भिणम् ।

६९—भिक्षादि—भिक्षा । गर्भिणी । क्षेत्र । कराष । अङ्गार । चर्मिन् । धर्मिन् । चमन् । धमन् । सहस्र । युवति । पदाति । पद्धति । अथर्वन् । अर्वन् । दक्षिणा । भूत । विषय । श्रोत्र ॥ वृक्षादिभ्यः खण्ड (१) ॥ वृक्षखण्ड । वृक्ष । तट । पादप । इति भिक्षादय ॥

६६—खण्डिकादिभ्यश्च ॥ अ० ४ । २ । ४५ ॥

खण्डिकादिभ्य समूहार्थेऽञ् प्रत्ययो भवति । खण्डिकाना समूहः खाण्डिकम् ।

७०—खण्डिकादि—खण्डिका । वडवा ॥ क्षुद्रकमालवात्

(१) खण्डशब्द पुस्तकान्तरपठित, न सर्वत्र । कचित्तु 'वृक्षादिभ्य षण्ड' इति पाठ । वृक्षषण्ड ॥

सेनासंज्ञायाम् (१)॥ भिक्षुक। शुक। बल्लूक। रन्। युग। अहन्। धात्रा। हलयन्य। इति स्वाण्डकादय ॥

६७-पाशादिभ्यो यः॥ अ० ४। २। ४९॥

षष्ठीसमर्थेभ्यः पाशादिभ्य समूहार्थे य प्रत्ययो भवति। पाशानां समूहः पाश्या रज्जु, मृग्या।

७१—पाशादि—पाश। मृग। धूम। वात। अङ्गार। पोत। बालक। पिटक। पिटाक। शकट। हल। मठ। वन। पटलका। गल। इति पाशादय ॥

६८-राजन्यादिभ्यो वुञ्॥ अ० ४। २। ५३॥

राजन्यादिप्रातिपदिकेभ्यो विषयो देश इत्येतस्मिन्नर्थे वुञ् प्रत्ययो भवति। राजन्यानां विषयो देश राजन्यक'।

७२—राजन्यादि—राजन्य। देवयान। शालङ्कायन। जालङ्गायन। आत्मकामेय। अम्बरीषपुत्र। वसाति। वैलूथान। वैदूष। कदुम्बर। वैन्यवल। आर्जुनायन। सप्रिय। दाक्षि। ऊर्णनाभ। आर्भीत। अग्रह। वैतिन। वाग्रक (?)। इति राजन्यादय'॥

६९-गौरिक्षायैषुकार्यादिभ्यो विधल्भक्तलौ॥ अ० ४। २। ५४॥

विषयो देश इत्येतस्मिन् विषये षष्ठीसमर्थेभ्यो गौरिक्षयादिभ्य ऐषुकार्यादिभ्यश्च यथासङ्ख्यं विधल्भक्तलौ प्रत्ययौ भवत। अणोऽपवाद। गौरिक्षीलो विषयो देश गौरिक्षिक, ऐषुकारिक॥

---

(१) शुनाम मल्लानामेति सन्निधानम्। तत्र पूर्वेणैवास्मिन् सिद्धे गोयवन् आधिक्यं यथास्यात्। शुनकमाढवानां समूह शौनकमाढवी सेना। सेनायामिति किमर्थम्। अध्यायानां समूह।

(२) अध्यायानुवाकाभ्यामण् आध्यायिकानौवाकिकौ विषयो देश। नैयंङ्क द्वयादय शब्दा सिद्धा भवन्ति॥

७३—भौरिक्यादि—भौरिकि । भौलिकि । वैपेय । चैटयत । काणेय । वाणिजक । वालिज । वालिज्यक । शैकयत । वैकयत । इति भौरिक्यादयः ॥

७४—ऐषुकार्यादि—ऐषुकारि । सारस्यायन । चान्द्रायण । दुर्याद्यायण । त्र्यायण । औडायन । जौडायन । खाडायन । सौवीर । दासमित्रि । दासमित्रायण । शौद्रायण । दाक्षायण । शयण्ड । तार्क्ष्यायण । शौभ्रायण । सायण्ड । शौण्ड । वैश्वमाणव । वैश्वधेनव । नद । तुण्डदेव । अलायत । औलालायत । शौण्ड । शायण्ड । वैश्वदेव । इत्यैषुकार्यादयः ॥

७०—क्रतुक्थादिसूत्रान्ताट्ठक् ॥ अ० ४ । २ । ६० ॥

तदधीते तद्वेदेत्यस्मिन् विषये क्रतुविशेषवाचिभ्य उक्थादिभ्यः सूत्रान्ताभ्य प्रातिपदिकाट्ठक् प्रत्यया भवति । अणोऽपवादः । अग्निष्टोममधीते वेद वा आग्निष्टोमिकः, वाजपेयिकः, औक्थिकः, वार्तिकसूत्रमधीत वार्त्तिकसूत्रिक , सांग्रहसूत्रिकः ।

७५—उक्थादि—उक्थ । लोकायत । न्याय । न्यास । निमित्त । पुनरुक्त । निरुक्त । यज्ञ । चर्चा । धर्म । क्रमेतर । लक्षण । संहिता । पद । क्रम । संघात । वृत्ति । संग्रह । गुणागुण । आयुर्वेद ॥ द्विपदी, ज्योतिषि (१) ॥ अनुपद । अनुकल्प । अनुगुण । इत्युक्थादयः ॥

७१—क्रमादिभ्यो वुन् ॥ अ० ४ । २ । ६१ ॥

तदधीत तद्वेदेत्यर्थे क्रमादिभ्यो वुन् प्रत्ययो भवति । क्रममधीते क्रमकः, पदकः ।

७६—क्रमादि—क्रम । पद । शिक्षा । मीमांसा । सामन् । इति क्रमादयः ॥

---

(१) द्विपदी ज्योतिःशास्त्रमधीते जानाति वा स द्वैपदिकः ॥

७२–वसन्तादिभ्यष्ठक् ॥ अ० ४ । २ । ६३ ॥

तदधीते तद्वेदेत्यस्मिन् विषये वसन्तादिप्रातिपदिकेभ्यष्ठक् प्रत्ययो भवति । वसन्तमहर्गितो ग्रन्थो वसन्तस्तमधीते वेद वा स वासन्तिकः, वासिकः । एवं सर्वत्र ।

७९—वसन्तादि—वसन्त । वर्षा । शरद् । हेमन्त । शिशिर । प्रथम । गुण । घर्म । अनुगुण । अपवेन् । अथर्वन् । इति वसन्तादयः ॥

७३–संकलादिभ्यश्च ॥ अ० ४ । २ । ७५ ॥

संकलादिप्रातिपदिकेभ्यश्चातुरर्थिकोऽञ् प्रत्ययो भवति । अणोऽपवादः । पुष्कला अस्मिन् सन्तीति पौष्कलो देशः, सिकतायां भवः सैकतः । यथासम्भवमर्थेसम्बन्धः ।

७८—संकलादि—संकल । पुष्कल । पद्भव । बहुप । उत्पुट । कुम्भ । विधान । सुदत्त । सुदत्त । सुभूत । सुमेत्र । सुपिङ्गल । सिकता । पूर्तायी । पूलाश । फूलाश । पलाश । निवेश । गवेश । गम्भीर । इतर । शर्मन् । अहन । लोमन् । वेमन् । वहाग । मङ्गल । सद्योज । अभिषिक्त । गोभृत् । राजभृत् । गृह । भृत । भल्ल । भाल । (भृत्) इति संकलादयः ॥

७४–सुवास्त्वादिभ्योऽण् ॥ अ० ४ । २ । ७७ ॥

सुवास्त्वादिप्रातिपदिकेभ्यश्चातुरर्थिकोऽण् प्रत्ययो भवति । अणोऽपवादः । सुवास्तोरदूरं नगरं [सौवास्त्यम्, वाणेयम् । अणन्तग्रहणं नद्यां मनुष्यं वाचनार्थम्] सौवास्तवी नदी ।

७९—सुवास्त्वादि—सुवास्तु । वर्णु । भगन्दु । अवन्दु । कवन्दु । वेषाशिन । कर्पूरन् । शिम्बिन् । गर्त । कर्दम । शाटीकर्ण । कृष्ण । कर्क । कर्कन्धुमती । गाङ्ग । गाहि । अहिमकथ । (भृत्) इति सुवास्त्वादयः ॥

७५—वुञ्छणकठजिलसेनिरढञ्णयायफक्फिञिञ्यकक्ठ-कोडीहणकृशाश्वर्यकुमुदकाशतृणप्रेक्षाश्मसखिसकाशबलपक्ष-क ँसुतङ्गमप्रगदिन्वराहकुमुदादिभ्य ॥अ०४ २।८०॥

अरीहणादिसप्तदशगणस्थप्रातिपदिकेभ्यश्चातुरर्थिका वुञ्चादय सप्तदशैव प्रत्यया यथासख्येन भवन्ति । आदिशब्द प्रत्येकमभिसबध्यते । यथासम्भवमर्थसम्बन्ध ।

अराहणादिभ्या वुञ् । अराहणाना निवासो देश आरीहणक, शिराघाणामदूरभवा ग्राम शराधिक ।

८०—अरीहणादि—अरीहण । द्रुघण । खदिर । सार । भगल । घलन्द । सापरायण । क्रौष्ट्रायण । भाखायण । त्रैगर्तायन । राय-स्पोष । विपथ । उद्दण्ड । उद्धन । खाडायन । खण्ड । वीरण । काशकृत्स्न । जाम्बवन्त । शिशपा । किरण । रैवत । वैल्व । चैमतायन । मैमतायण । सौसायन । शाण्डिल्यायन । शिरीष । बधिर । त्रैगतायण । गौमतायण । सौमतायण । खाण्डायण । विपाश । सुषद्म । जम्बू । सुशर्म । इत्यराहणादय ॥

कृशाश्वादिभ्यश्छण् ॥ कार्शाश्वाय , अरिष्टेन निर्वृतमारिष्टीयम् ।

८१—कृशाश्वादि कृशाश्व । ऋष्टि । अराश्व । वेश्मन् । विशाल । रोमक । शबल । कूट । रामन् । वर्वर । सुकर । सूकर । प्रत्तर । सदृश । पुरग । सुख । धूम । अजिन । विनता । वनिता । अवनत । कुविद्यास । अकस । अवयास । अयावस । मौद्गल्य । इति कृशाश्वादय ॥

ऋश्यादिभ्य क ॥ न्यग्रोधानामदूरभव वन न्यग्रोधकम् ।

८२—ऋश्यादि—ऋश्य । न्यग्रोध । शिरा । निलीन । निवास । निधान । निवात । निषद्ध । विबद्ध । परिगूढ । उपगूढ । उत्तराश्मन् । स्थूलषाठ । खदिर । शर्करा । अनड्वह् । परिवश । वेणु । वीरण । खण्ड । परिवृत्त । कर्दम । अशु । इति ऋश्वादय ॥

कुमुदादिभ्यश्च ॥ वल्वजाः सन्त्यस्मिन् स वल्वजिको दशः ।

८३—कुमुदादि—कुमुद । शर्करा । न्यग्रोध । चक्कट । इक्कट । गर्त । बीज । अश्वत्थ । वल्वज । परिवाप । शिरीष । यवाप । कूप । विकङ्कत । कण्टक । कङ्कट । संकट । पलाश । त्रिक । कत । दक्षिण । इति कुमुदादयः ॥

काशादिभ्य इलः । काशाः सन्ति यत्र स काशिलो देशः ।

८४—काशादि—काश । वाश । अश्वत्थ । पलाश । पांसूप । विश । विस । तृण । नर । चरण । कदम । कर्पूर । कण्टक । गृह । आवास । नड । वन । बधूल । बदेर । इति काशादयः ॥

तृणादिभ्यः श. । तृणानि यत्र सन्ति स तृणशो देशः ।

८५—तृणादि—तृण । नड । घुस । पर्ण । वर्ण । चरण । अर्ण । जन । बल । लव । वन । इति तृणादयः ॥

प्रेक्ष्यादिभ्य इनिः । प्रेक्षया निर्वृत्तः प्रेक्षी ।

८६—प्रेक्षादि—प्रेक्षा । इलका । फलका । धन्वुका । भ्रुवका । क्षिपका । न्यग्रोध । इर्वुट । शुष्कका । संकट । कूपका । कर्कटा । शुष्कटा । मङ्कट । शुष्क । मद्रा । इति प्रेक्षादयः ॥

अश्मादिभ्यो रः । अश्मना निर्वृत्तः अश्मरः ।

८७—अश्मादि—अश्मन् । यूष । दध । मीन । दर्भ । शृङ्ग । शुद्ध । अरण्ड । नग । शिखा । यूथ । दध । नद । नख । काट । श्याम । इत्यश्मादयः ॥

मध्यादिभ्यो दक् ॥ मध्यायः सन्त्यत्र साध्यो देशः ।

८८—मध्यादि—मधि । सधिदध । वायुदत्त । गोहित । गोदिल । मद्र । पाल । पक्षपाल । पक्षवान । शृगाल । अशोक । करवीर । शंकर । मकर । मरम । मसल । चर्क । वक्षपाल । वक्षोर । मुरस । गोद्र । समाल । कदल । सतन । इति मध्यादयः ॥

संकाशादिभ्यो यः । सांकाश्यवत् । काम्पिल्यस्यादूरभवो मामः—काम्पिल्यः ।

८१—सकाश्यादि—सकाश । काम्पिल्य । समीर । कश्मर । शूरसेन । सुपथिन् । सक्थच । यूप । अश्व । एग । अश्मन् । कूट । मलिन । तीर्थ । अगस्ति । विरत । चिकार । विरह । नासिका । इति सकाशादय ॥

बलादिभ्यो य प्रत्यय ॥ बलेन निर्वृत्तो बल्य ।

९०—बलादि—बल । चुल । तुल । डल । डुल । कपल । वन । झुल । इति बलादय ॥

पत्त्रादिभ्य फक प्रत्यय । पत्त्रेण निर्वृत्त पात्त्रायण ।

९१—पत्त्रादि—पत्त्र । तुप । अण्ड । कम्बलिक । चित्र । अश्मन् । अतिस्रन् ॥ पथिन्, पन्थ च (१) ॥ कुम्भ । सौरज । सौरक । सरक । सलक । सरम । समल । रोमन् । लोमन् । हसका । लोमक । सकण्डक । अस्तिमल । यमल । हस्त । सिंहक । इति पत्त्रादय ॥

कर्णादिभ्य फिञ् प्रत्यय ॥ कर्णस्य निवास कार्णायनि ।

९२—कर्णादि—कर्ण । वसिष्ठ । अलुश । शल । डुपद । अनड्वह । पाञ्चजन्य । स्थिरा । डुलिश । कुम्भी । जीवन्ती । जिल्व । आण्डीवत् । अर्क । लूप । स्फिच् । ह्रावत् । इति कर्णादय ॥

सुतङ्गमादिभ्य इञ् प्रत्ययो भवति । सुतङ्गमेन निर्वृत्त सौतङ्गमि ।

९३—सुतङ्गमादि—सुतङ्गम । मुनिचित्त । विप्रचित्त । महा पुत्र । श्वेत । गडिक । शुक्र । चित्र । बीजवापिन् । अन । अर्जुन । अजिर । जीव । इति सुतङ्गमादय ॥

प्रगदिन्नादिभ्यो ञ्य प्रत्यया भवति ॥ प्रगदिना यत्र सन्ति स प्रागद्यो दश ।

९४—प्रगदिनादि—प्रगदिन् । मगदिन् । शरदिन् । कलिव । खडिव । गडिव । चूडार । मार्जार । कोविदार । इति प्रगदिन्नादय ॥

(१) पथोऽपूरभव वन पान्थायतनम् ॥

वराहादिभ्यः कक् प्रत्ययः ॥ वराहाः सन्ति यत्र स वाराहको देशः । पालाशकः ।

६५—वराहादि—वराह । पलाश । शिरीष । पिनद्ध । स्थूण । विदग्ध । विभग्न । बाहु । मन्दिर । शर्कर । विनद्ध । नियद्ध । विरद्ध । मूल । इति वराहादय ॥

कुमुदादिभ्यष्ठक् प्रत्ययो भवति ॥ कुमुदाः सन्ति यस्मिन् देशे स कौमुदिको देशः । ।

६६—कुमुदादि—कुमुद । गोमथ । शकार । दशग्राम । अश्वत्थ । शाल्मली । कुण्डल । मुनिस्थूल । कुट । मुचुकर्ण । कुन्द । मधुकर्ण । शुचिकर्ण । शिरीष । इति कुमुदादय. ।

७६—वरणादिभ्यश्च ॥ अ० ४ । ३ । ८२ ॥

वरणादिप्रातिपदिकेभ्य उत्पन्नस्य चातुरर्थिकप्रत्ययस्य लुक् भवति । वरणानामदूरभवं नगरं वरणा' ।

६७—वरणादि—वरणाः । पूर्वा गोदौ । पूर्वेण गोदौ । अप-रेण गोदौ । आलिङ्ग्यायन । पर्णी । शृङ्गी । शाल्मलय । सदाणुर्वी । वणिक् । वणिज् । जालपद । मथुरा । उज्जयिनी । गया । तक्ष-शिला । उरुवा । आकृत्या (१) । इति वरणादय ॥

७७—मध्वादिभ्यश्च ॥ अ० ४ । २ । ८६ ॥

मध्वादिशब्देभ्यश्च तुरर्थिको मातुपूप्रत्ययो भवति । मध्वस्मिन्नस्ति मधुमान् ।

६८—मध्वादि—मधु । मिस । मक्षु । कुट्टि । हट्टि । इक्षु । वेणु । रम्य । ग्रह । कर्क-धु । दार्वी । किरीर । हिम । किंशार । शष्पेणा । मरु । मरव । दार्वीघाट । शर । इष्टका । तक्षशिला ।

---

(१) अत्र सूत्रस्य चकारेणाकृतिगणत्वं बुध्यते । तेन कट्टकपदर्वा अदूरभवो नाम: कट्टकपदरी, किरीणा:, कर्श्वी इत्यादि ।

शक्ति। आसन्दी। आसुति। शलाका। आमिधी। खडा। वेटा। इति मध्वादय ।

७८—उत्करादिभ्यश्छ ॥ अ० ४। २। ६० ॥

उत्करादिप्रातिपदिकभ्यश्च तुरधिकश्छ प्रत्ययो भवति। यथा सम्भवमर्थसम्बन्ध । अकाणामदूरभवा ग्राम, अर्कीय ।

६६—उत्करादि—उत्कर। सफल। सकर। शर्कर। पिप्पल। पिप्पलीमूल। अश्मन्। अर्क। पर्ण। सुपर्ण। खनाजिन। इडा। अग्नि। तिक। कितव। आतप। अनक। पलाश। तृणव। पिचुक। अश्वत्थ। शकाक्षुद। भल्ला। विशाला। अजरोहित। गर्त। शाल। अन्य। जन्या। अजिन। मञ्च। चर्मन्। उत्काश। शान्त। खदिर। शूर्पणाय। श्यावनाय। नैत्र। वक। नितान्त। वृक्ष। इन्द्रवृक्ष। आर्द्रवृक्ष। अर्जुनवृक्ष। इत्युत्करादय ॥

७९—नडादीना कुक् च ॥ अ० ४। २। ६१ ॥

नडादिप्रातिपदिकेभ्यश्चातुरधिकश्छ प्रत्यया भवति तस्मिन् सति कुगागमश्च। यथासभवमर्थसम्बन्ध। नडा सन्ति यत्र तन्नडकीय वनम्।

१००—नडादि—नड। प्लक्ष। भिल्व। वेणु। वेत्र। वतस। तृण। इक्षु। काष्ठ। कपाल ॥ क्षुद्राया ह्रस्वत्व च (१) ॥ तत्तक्षलापश्च ॥ इति नडादय ॥

८०—कत्र्यादिभ्यो ढकञ् ॥ अ० ४। २। ६५ ॥

कत्र्यादिशब्देभ्य शैषार्थे ढकञ् प्रत्ययो भवति। कत्र्यां भव कात्रेयक ।

१०१—कत्र्यादि—कत्रि। उम्भि। पुष्कर। पुष्कल। मादन। कुम्भी। कुण्डिन। नगर। वज्रो। भक्ति। माहिष्मती। चर्मण्वती धर्मती। ग्राम। उल्या ॥ क्षुद्राया यलोपश्च (२) ॥ इति कत्र्यादय ॥

---

(१) क्षुद्रा सन्त्यस्मिन् तत् क्षुद्रकीय वनम्, तक्षकीयो ग्राम ॥

(२) क्षुल्यायां भव क्षौल्येयक। यकारलोप ॥

८१-नद्यादिभ्यो ढक् ॥ अ० ४ । २ । ९७ ॥

नद्यादिभ्यः प्रातिपदिकेभ्यः शैषिको ढक् प्रत्ययो भवति । नद्यां भवं नादेयम् ।

१०२—नद्यादि—नदी । मही । वाराणसी । श्रावस्ती । कौशाम्बी । नवकौशाम्बी । शफरी । खादिरी । पूर्वनगरी (१) । पावा । मावा । साल्वा । दार्वा । दाल्वा । वासेनकी ॥ वडवाया यूपे ॥ इति नद्यादयः ॥

८२-प्रस्थोत्तरपदपलद्यादिकोपधादण् ॥अ०४।२।११०॥

प्रस्थोत्तरपदात् पलद्यादिभ्यः कोपधाच्च प्रातिपदिकादण् प्रत्ययो भवति शैषिकः । मद्रीप्रस्थे भवो माद्रीप्रस्थ, माहकीप्रस्थ ; पलद्यां भवः पालदः, पारिषद, कोपधात्—नैलीनकः ।

१०३—पलद्यादि—पलदी । परिषद् । यकृल्लोमन् । रोमक । कालकूट । पटच्चर । वाहीक । कलकूट । मलकूट । कमलकूट । कमलभिदा । कमलकार । वाहुकूट । नैतकी । परिखा । शूरसेन । गोमती । मद्रपान । पद्म । कललकूट । कललकोकटा । गोष्ठी । नैधिकी । नैरेती । सक्थ्यूरुलोमन् । इति पलद्यादयः ॥

८३-कण्वादिभ्यो गोत्रे ॥ अ० ४ । २ । १११ ॥

गोत्रप्रत्ययान्तकण्वादिप्रातिपदिकेभ्यः शैषिकोऽण् प्रत्ययो भवति । काण्व्यस्त्वम काण्वारब्धात्रा ।

१०४—कण्वादि—गर्गाद्यन्तर्गताः कण्वादयः । अत एवात्र न लिख्यन्ते ॥

---

(१) पूर्वनगरी भवः पौर्वनगरेयः अत्र [पदा] 'पूः, वन, गिरि' इति पाठान्तरं तद्वा-पौरेयम्, वानेयम्, गैरेयमिति विभक्तं रूपत्रयं सिध्यति ॥

८४—काश्यादिभ्यष्ठञ्ञिठौ ॥ अ० ४ । २ । ११६ ॥

काश्यादिप्रातिपदिकेभ्य औपिकौ ठञ्ञिठौ प्रत्ययौ भवत । प्रत्यययोर्नकारविपर्ययभेदात् स्त्रीप्रत्यये विशेष । ठञन्तात् ङीप्, ञिठान्तात् तु टाबेव भवति । काश्या भव काशिक, काशिकी, काशिका ।

१०५—काश्यादि—काशि । चेदि । वैदि । सञ्ज्ञा । सघाह । अच्युत । मोहमान । शकुलाद । हस्तिकर्षू । कुदामन् । कुनामन् । हिरण्य । करण । गोधाशन । भौगिकि । भौलिङ्गि । अरिन्दम । सर्वमित्र । दत्तदत्त । साधुमित्र । दासमित्र । दासग्राम । सौवास्तान । युवराज । उपराज । सिन्धुमित्र । दवराज ॥ आपदादिपूर्वपदात् कालान्तात् ॥ आपत्कालिकी । आपत्कालिका । और्ध्वकालिकी । और्ध्वकालिका । तात्कलिका । तात्कालिका । इति काश्यादय ॥

८५—धूमादिभ्यश्च ॥ अ० ४ । २ । १२७ ॥

देशवाचिभ्यो धूमादिप्रातिपदिकेभ्य औपिका युञ् प्रत्ययो भवति । अणोऽपवाद । धूम भवो धौमक ।

१०६—धूमादि—धूम । दण्ड । खडण्ड । शशादन । आर्जुनाद । दाण्डायनस्थली । माहकस्थली । घापस्थली । मापस्थली । राजस्थला । राजगृह । सत्रासाह । भक्षास्थली । भद्रकूल । गर्तकूल । आर्जीकूल । द्वयाहाव । त्र्याहाव । सहाय । वर्वर । वर्चगर्त्त । विदेह । आनर्त्त । माठर । पाथेय । घोष । शिष्य । मित्र । बल । अराज्ञी । धार्त्तराज्ञी । अवयात । तीर्थ ॥ कूलात्सौवीरेषु ॥ समुद्रान्नावि मनुष्ये च (१) ॥ कुक्षि । अन्तरीप । द्वीप । अरण । उज्जयिनी । दक्षिणापथ । साकेत । मानवल्ली । वल्ली । सुराज्ञी । इति धूमादय ।

(१) समुद्रशब्दान्नावि मनुष्ये च वाच्ये युञ् । समुद्रे भवा सामुद्रिका नौ । सामुद्रिको मनुष्यः । अन्यत्र सामुद्र जलम् ॥

८६—कच्छादिभ्यश्च ॥ अ० ४ । २ । १३३ ॥

कच्छादिदेशवाचिप्रातिपदिकेभ्य. शैषिकोऽण् प्रत्ययो भवति । वुञादेरपवाद: । कच्छे भव. काच्छ: ।

१०७—कच्छादि—कच्छ । सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । वुद्र । रङ्कु । अणु । अण्ड । खण्ड । द्वीप । अनूप । अजवाह । विजापक । कुल्टन । इति कच्छादय: ॥

८७—गहादिभ्यश्च ॥ अ० ४ । २ । १३८ ॥

गहादिप्रातिपदिकेभ्य: शैषिकरञ्प्रत्ययो भवति अणञोरपवाद: । अन्त:स्थे भव: अन्त:स्थीय: ।

१०८—गहादि—गह । अन्त.स्थ । स । विषम ॥ मध्यमध्यमं चाण् चरणे (१) ॥ उत्तम । अङ्ग । वङ्ग । मगध । पूर्वपद । अपर-पद । अधमशाख । उत्तमशाख । समानशाख । एकग्राम । एकवृन्त । एकपलाश । इक्षुवन । इक्षुनीक । अवस्यन्दी । अवस्कन्द । कामप्रस्थ । साढायनि । साण्ढायनी । कावेरणि । कामवेरणि । शैशिरि । शौङ्गि । आसुरि । आहिंसि । आमित्रि । व्याडि । वैदजि । भौजि । आद्वर्यश्वि । आनृशंसि । सौधि । पारकि । अग्निशर्मन् । देवशर्मन् । औदि । आरटकि । वाल्मीकि । क्षेमवृद्धिन् । उत्तर । अन्तर ॥ मुख-पार्श्वसोर्लोप: ॥ जनपरयो: मुक् च ॥ देवस्य च ॥ वेणुकादि-भ्यश्चण् (२) इति गहादय: ॥

---

(१) अस्यैव सूत्रस्य दीपवार्तिकप्रमाणेन पूर्वापरमध्यशब्दस्य मध्यमादेशश्चरणेऽभिधेये निवासलक्षणोऽण् प्रत्यय: । मध्यत्र भु छ पूर्व । पूर्वापरमध्ये निवास पूर्वा ते माध्यमाश्चरणा: । चरणादन्यत्र—मध्ये भवो मध्यमीय. ॥

(२) मुखपार्श्वयोर्नसन्तयोरत्यलोप. । मुखतो भव मुख्यीयम्, पार्श्वीयम् । जने भवो जनीय:, परीय: । देवे भक्तिरस्य देवीय: । वेणुकादिराकृतिगण: । वेणुकदेशो भवो वैणुकीय:, वैरणकीय:, पालाशकीय: ॥

८८—सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ॥ अ० ४ । ३ । १६ ॥

सन्धिवेलादिभ्य ऋतुभ्यो नक्षत्रेभ्यश्च कालवाचिभ्यः प्रातिपदिकेभ्यः शैषिकोऽण् प्रत्ययो भवति । ठञोऽपवादः । अण्ग्रहणं वृद्धाच्छस्य बाधनार्थम् । सन्धिवेलायां जातः सान्धिवेलः, प्रैषमः, शैषः, पौषः ॥

१०९—सन्धिवेलादि—सन्धिवेला । सन्ध्या । अमावास्या । त्रयोदशी । चतुर्दशी । पञ्चदशी । पौर्णमासी । प्रतिपत् ॥ संवत्सरात् फलपर्वणोः ॥ सांवत्सरं फलम् । सांवत्सरं पर्व । इति सन्धिवेलादयः ॥

८९—दिगादिभ्यो यत् ॥ अ० ४ । ३ । ५४ ॥

सप्तमीसमर्थेदिगादिप्रातिपदिकेभ्यो भवार्थे यत् प्रत्ययो भवति । अणश्छस्य चापवादः । दिशि भवं दिश्यम् ।

११०—दिगादि—दिश् । वर्ग । पूग । गण । पक्ष । धाव्या । मित्र । मेधा । अन्तर । पथिन् । रहस् । अलीक । सखा । साक्षिन् । आदि । अन्त । मुख । जघन (१) । मेघ । यूथ ॥ उदकात् संज्ञायाम् (२) ॥ न्याय । वंश । अनुवंश । विश । काल । अप् । आकाश । इति दिगादयः ॥

९०—वा०—व्ययप्रकरणे परिमुखादिभ्य उपसंख्यानम् ॥ अ० ४ । ३ । ५६ ॥

अव्ययीभावसंज्ञकेभ्यः परिमुखादिप्रातिपदिकेभ्यो व्यप्रत्ययो भवति । नियमार्थं वार्त्तिकमिदम् । सूत्रेण सामान्याव्ययीभावाद्

---

(१) मुखजघनशब्दाभ्यां शरीरावयवत्वादेव यति सिद्धे पुनरत्र दिगादिषु पाठोऽशरीरावयवार्थः । सेनामुखे भवं सेनामुख्यम्, सेनाजघन्यम् । सेनाया अग्रपश्चाद्भागौ गृह्येते । तदन्तविधिना यत् ॥

(२) उदके भवा उदक्या रजस्वला । संज्ञाग्रहणादिह न भवति—उदके भव औदको मत्स्यः ॥

व्यः प्राप्तो नियम्यते । परिमुखं भवं पारिमुख्यम् । पारिहेनव्यम् । नियमादिह न भवति—उपकूलं भवमौपकूलम् ।

१११—परिमुखादि—परिमुख । परिहेनु । पर्योष्ठ । पर्येलु । औपमूल । खल । परिसीर । अनुसीर । उपसीर । उपस्थल । उपकलाप । अनुपथ । अनुखड्ग । अनुतिल । अनुशीत । अनुमाष । अनुयन्त्र । अनुयूप । अनुवंश । अनुस्वङ्ग । इति परिमुखादयः ॥

६१—या०—अध्यात्मादिभ्यश्च ॥ ४ । ३ । ६० ॥

अध्यात्मादिभ्यो भवार्थे ठञ् प्रत्ययो भवति । अध्यात्मं भव—आध्यात्मिकम् ।

११२—अध्यात्मादि—अध्यात्म । अधिदैव । अधिभूत । आङ्गविगणोऽयम् । इत्यध्यात्मादयः ॥

६२—अण् ऋगयनादिभ्यः ॥ अ० ४ । ३ । ७३ ॥

षष्ठीसप्तमीसमर्थेभ्य ऋगयनादिप्रातिपदिकेभ्यो भवव्याख्यानयो-र्थयोरण् प्रत्ययो भवति । ऋगयने भवमार्गयनः, तस्य व्याख्यानो वा । अर्णग्रहणं वायकवाचनार्थम् । वास्तुविद्याया व्याख्यानो ग्रन्थो वास्तुविद्यः । अत्र ञ्प्रत्ययं मामनू ।

११३—ऋगयनादि—ऋगयन । पदव्याख्यान । छन्दोमान । छन्दोमापा । छन्दोविचिति । न्याय । पुनर्मख । व्याकरण । निगम । वास्तुविद्या । अङ्गविद्या । क्षत्रविद्या । दत्पाल । दत्पाद । संवत्सर । मुहूर्त । निमित्त । उपनिषद् । शिक्षा । छन्दोविचिती । न्याय । निरुक्त । विद्या । ज्योत्स्ना । भिक्षा । इति ऋगयनादयः ॥

६३ शुण्डिकादिभ्योऽण् ॥ अ० ४ । ३ । ७६ ॥

षष्ठीसप्तमीसमर्थेभ्यः शुण्डिकादिप्रातिपदिकेभ्य आगतार्थेऽण् प्रत्ययो भवति । शुण्डिकादागतः शौण्डिकः ॥

११४—शुण्डिकादि—शुण्डिक । कुक्कुण । त्यखिडल । उदपान । उपल । सांधि । भूमि । शृङ्ग । पर्ण । इति शुण्डिकादयः ॥

९४—शण्डिकादिभ्यो ञ्यः ॥ अ० ४ । ३ । ९२ ॥

प्रथमासमर्थशण्डिकादिप्रातिपदिकेभ्योऽभिजनेऽभिधेये ञ्यः प्रत्ययो भवति । शण्डिकोऽभिजनोऽस्य स शाण्डिक्यः ॥

११५—शण्डिकादि—शण्डिक । सर्वकेश । सर्वसेन । शक । शट । रक्ष । शङ्ख । बांध । इति शण्डिकादयः ॥

९५—सिन्धुतक्षशिलादिभ्योऽणञौ ॥ अ० ४ । ३ । ९३ ॥

प्रथमासमानाधिकरणेभ्य सिन्ध्वादिभ्यस्तक्षशिलादिभ्यश्चाभिजनेऽर्थे यथासंख्यमणञौ प्रत्ययौ भवत । सिन्धुरभिजनोऽस्य स सैन्धव । तक्षशिलाऽभिजनोऽस्य स तात्क्षशिलः । प्रत्ययभेदः स्वरभेदार्थ ॥

११६—सिन्ध्वादि—सिन्धु । वर्णु । गन्धार । मधुमत् । कम्बोज । कश्मीर । साल्व । किष्किन्धा । गन्दिका । उरस । दरत् । कुलटून । दिरसा । इति । सिन्ध्वादय ॥

११७—तक्षशिलादि—तक्षशिला । वत्सोद्धरण । कौमेदुर । काण्डवारण । ग्रामणी । सरालक । कस । किन्नर । संकुचित । सिंहकोण । कर्णकांष्ठ । बर्बर । अवसान । इति तक्षशिलादयः ॥

९६—शौनकादिभ्यश्छन्दसि ॥ अ० ४ । ३ । १०६ ॥

तृतीयासमर्थशौनकादिप्रातिपदिकेभ्यश्छन्दसि चेद् प्रोक्तार्थे णिनिः प्रत्ययो भवति । छाणोरपवाद । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । छन्दसीति किम् । शौनकीया शिक्षा । अत्र छन्द एव भवति ।

११८—शौनकादि—शौनक । वाजसनेय । शाङ्गरव । सापेय । शाकेय । खाडायन । स्कन्द । स्कन्ध । देवदत्तशठ । रज्जुकण्ठ । रज्जुभार । कठशाठ । कशाय । वलवकार । पुरुषासक । अश्वपेय । कम्म । इति शौनकादयः ॥

९७–कुलालादिभ्यो वुञ् ॥ अ० ४ । ३ । ११८ ॥

तृतीयासमर्थकुलालादिप्रातिपदिकेभ्यो वुञ् प्रत्ययो भवति। कृतमित्येतस्मिन्नर्थे संज्ञायां गम्यमानायाम्। कुलालेन कृतं कौलाल-कम्, चाण्डकम्।

११९—कुलालादि—कुलाल। चण्ड। चण्डाल। निषाद। कर्मार। सेना। सिरिन्ध्र। वैन्द्रिय। देवराज। परिषद्। यधू। रथ। ध्रुव। रट्ट। अनड्वह्। ब्रह्मन्। कुम्भकार। श्वपाक। इति कुलालादयः॥

९८–रैवतिकादिभ्यश्छः ॥ ४ । ३ । १३१ ॥

रैवतिकादिभ्यश्छः प्रत्ययो भवति, तस्येदमित्येतस्मिन् विषये। रैवतिकीयः, स्वापिशीयः।

१२०—रैवतिकादि—रैवतिक। स्वापिशि। क्षेमवृद्धि। गौरग्रीवि। औदमेधि। औदवाहि। वैजवापि॥ इति रैवतिकादयः॥

९९–बिल्वादिभ्योऽण् ॥ अ० ४ । ३ । १३६ ॥

षष्ठीसमर्थेबिल्वादिप्रातिपदिकेभ्यो विकारावयवयोर्यथासंख्यमण् प्रत्ययो भवति। बिल्वस्य विकारोऽवयवो वा बैल्वः।

१२१—बिल्वादि—बिल्व। सौदि। फाण्ड। मुद्ग। मसूर। गोधूम। इक्षु। वेणु। गवेधुका (१)। कर्पासी। पाटली। कर्कन्धू। कुटीर। इति बिल्वादयः॥

१००–पलाशादिभ्यो वा ॥ अ० ४ । ३ । १४१ ॥

पलाशादिप्रातिपदिकेभ्यो विकारावयवयोरञ् प्रत्ययो भवति। पलाशस्य विकारः पालाशम्, शाखादिम्।

१२२—पलाशादि—पलाश। शखि। शिरीष। शमीर। शिरीष। पलाश। विकङ्कत। इति पलाशादयः॥

---

(१) अस्मात् 'कोदवाच' (अष्टा० ४ । १ । ४१०) इत्यजि सिद्धे पुनः पाठो मयड्वैतयोरर्थयोः। तेनास्मात् पक्षेऽपि मयड्वैतयोर्भवति॥

१०१–नित्यं वृद्धशरादिभ्यः ॥ अ० ४ । ३ । १४४ ॥

वृद्धेभ्यः शरादिभ्यश्च प्रातिपदिकेभ्यो भक्ष्याच्छादनयोर्विकारावयवयोर्भाषायां विषये नित्यं मयट् प्रत्ययो भवति । वृद्ध–आम्रमयम्, शालमयम् । शरमयम्, दर्भमयम् ।

१२३—शरादि—शर । दर्भ । मृत् । कुटी । तृण । सोम । चलज । इति शरादयः ॥

१०२–तालादिभ्योऽण् ॥ अ० ४ । ३ । १५२ ॥

तालादिप्रातिपदिकेभ्यो विकारावयवयोरण् प्रत्ययो भवति । तालस्य विकारः तालं धनुः । अन्यत्र तालमयम् । वृद्धत्वान्मयट् ।

१२४—तालादि—तालाद्धनुषि ॥ बार्हिण ॥ इन्द्रालिश । इन्द्राटश । इन्द्रायुध । चाप । धर्व । श्यामाक । पायुदा । इति तालादयः ॥

१०३–प्राणिरजतादिभ्योऽण् ॥ अ० ४ । ३ । १५४ ॥

प्राणिवाचिभ्यो रजतादिभ्यश्च प्रातिपदिकेभ्यो विकारावयवयोरण् प्रत्ययो भवति । कपोतस्य विकारः कापोतम्, राजतम् ।

१२५—रजतादि—रजत । सीस । लोह । उदुम्बर । नील । नील । दारु । रोहितक । विभीतक । कपीत । दारु । तीव्रदारु । त्रिकण्टक । कण्टकार । इति रजतादयः ॥

१०४ प्लक्षादिभ्योऽण् ॥ अ० ४ । ३ । १६४ ॥

प्लक्षादिप्रातिपदिकेभ्यो विकारावयवत्वेन विवक्षिते फलेऽभिधेयेऽण् प्रत्ययो भवति । प्लक्षस्य विकारः प्लाक्षम्, नैयग्रोधम् ।

१२६—प्लक्षादि—प्लक्ष । न्यग्रोध । अश्वत्थ । इङ्गुदी । शिग्रु । कर्कन्धु । कर्कन्तु । ऋक्रतु । पृदाकु । काक । तुरुष्क । इति प्लक्षादयः ॥

१०५–हरीतक्यादिभ्यश्च ॥ अ० ४ । ३ । १६७ ॥

हरीतक्यादिप्रातिपदिकेभ्यः फलेऽभिधेये प्रत्ययस्य लुक् भवति ।

लुकि प्राप्ते लुपो विधानं युक्तवद्भावार्थम्। हरीतक्याः फलं हरीतकी, हरीतक्याः फलानि हरीतक्यः (१)।

१२७—हरीतक्यादि—हरीतकी। कोशातकी। नखरजनी। नखरञ्जनी। शष्कुली। शाकुली। दाढी। दोढी। दडी। श्वेतपाकी। अर्जुनपाकी। काला। ताला। घाडुला। गर्गरिका। कण्डकारिका। शेफालिका। इति हरीतक्यादयः।

१०६—पर्णादिभ्यः घुन् ॥ अ० ४। ४। १० ॥

पर्णादिभ्यश्चरतीत्यर्थे घुन् प्रत्ययो भवति। पक्षाभ्यां हीयर्थः। पर्णेन चरति पर्णिकः, पर्णिकी।

१२८—पर्णादि—पर्ण। अश्व। अश्वत्थ। रथ। जाल। न्याय। व्याल ॥ पाद। पद्य ॥ पदिक। इति पर्णादयः ॥

१०७—चेतनादिभ्यो जीवति ॥ अ० ४। ४। १२ ॥

तृतीयासमर्थेभ्यश्चेतनादिप्रातिपदिकेभ्यो जीवतीत्यर्थे ठक् प्रत्ययो भवति। चेतनेन जीवति चैतनिकः।

१२९—चेतनादि—चेतन। वाह। अर्द्धवाह। धनुर्दण्ड (२)। जाल। वेस। उपवेस। प्रेषण। उपनि। सुग्व। शय्या। शक्ति। उपनिषद्। उपवेष। यक्। पाद। उपस्थान। इति चेतनादयः।

१०८—हरत्युत्सङ्गादिभ्यः ॥ अ० ४। ४। १५ ॥

तृतीयासमर्थेभ्य उत्सङ्गादिप्रातिपदिकेभ्यो हरतीत्यर्थे ठक् प्रत्ययो भवति। उत्सङ्गेन हरति, औत्सङ्गिकः।

---

(१) "हरीतक्यादिषु व्यक्तिर्भवति पुष्पफलाभ्याम्" (महा० १।१।७१) इति भाष्येण भिन्नत्वेऽपि पुष्पफलाभ्यां न तु सर्वतस्ते।

(२) अत्र संग्रामादिभ्यो ढीत्यर्थं भवति। धनुर्दण्डेन धानुर्दण्डिकः। धनुषा जीवति धानुष्कः, दाण्डिकः ॥

१३०—उत्सङ्गादि—उत्सङ्ग । चडुप । उत्पत । पिटक । वडप । पिटाक । इत्युत्सङ्गादय ॥

१०९—भस्त्रादिभ्य ष्ठन् ॥ अ० ४ । ४ । १६ ॥

भस्त्रादितृतीयासमर्थप्रातिपदिकेभ्यो हरतीत्यर्थे ष्ठन् प्रत्ययो भवति। भस्त्रया हरति भास्त्रिक , भास्त्रकी ।

१३१—भस्त्रादि—भस्त्रा । भरट । भरण । भारण । शीर्षभार । शीर्षेभार । असभार । असेभार । इति भस्त्रादय ॥

११०—निर्वृत्तेऽक्षद्यूतादिभ्य. ॥ अ० ४ । ४ । १९ ॥

अक्षद्यूतादितृतीयासमर्थप्रातिपदिकेभ्यो निर्वृत्तेऽर्थे ठक् प्रत्ययो भवति । अक्षद्यूतेन निर्वृत्तम् आक्षद्यूतिक वैरम् ।

१३२—अक्षद्यूतादि—अक्षद्यूत। जानुप्रहृत। जङ्घाप्रहृत। पादस्वेदन। कण्टकमर्दन। गतागत। यातोपयात। अनुगत। इत्यक्षद्यूतादय ॥

१११—अण् महिष्यादिभ्य. ॥ अ० ४ । ४ । ४८ ॥

षष्ठीसमर्थमहिष्यादिप्रातिपदिकेभ्यो धर्म्यमित्यर्थेऽण् प्रत्ययो भवति । महिष्या धर्म्य माहिषम्

१३३—महिष्यादि—महिषी । प्रजावती । प्रलेपिका । विलेपिका । अनुलेपिका । पुरोहित । मणिपाली । अनुचारक । होतृ । यजमान । इति महिष्यादय ॥

११२—किशरादिभ्य ष्ठन् ॥ अ० ४ । ४ । ५३ ॥

प्रथमासमानाधिकरणकिशरादिप्रातिपदिकेभ्य पण्यमित्यर्थे ष्ठन् प्रत्ययो भवति । गन्धविशेषवाचका किशरादय । किशरा पण्यमस्य किशरिक । किशरिकी ।

१३४—किशरादि—किशर । नरद । नलद । सुमङ्गल । तगर । गुग्गुल । उशीर । हरिद्रा । हरिद्रायणी । इति किशरादय ॥

११३—छत्रादिभ्यो णः ॥ अ० ४ । ४ । ६२ ॥

११७–उगवादिभ्यो यत् ॥ अ० ५ । १ । २ ॥

ऽवर्णान्ताद् गवादिभ्यश्च प्रातिपादिकेभ्य प्राक्कीतीयेष्वर्थेषु यत् प्रत्ययो भवति । शङ्कवे हित शङ्कव्य दारु, गवे हित गव्यम् ।

१३९—गवादि—गो । हविस् । बहिस् । खट । अष्टका । युग । मेधा । स्रक् ॥ नाभि नभ च ॥ शुन सम्प्रसारण वा च दीर्घत्व तत्संनियोगेन चान्तोदात्तत्वम् (१) ॥ शुन्यम् । शून्यम् ॥ ऊधसोऽनङ् च ॥ ऊधन्य । कूप । उदर । खर । स्रुव । अक्षर । विष । स्कन्द । अध्वा । इति गवादय ॥

११८–विभाषा हविरपूपादिभ्य. ॥ अ० ५ । १ । ४ ॥

हविर्विशेषवाचिभ्योऽपूपादिभ्यश्च प्रातिपदिकेभ्य प्राक्क्रीतीयेष्वर्थेषु विभाषा यत् प्रत्ययो भवति, पक्षे छ । पुरोडाशाय हिता पुरोडाश्या, पुरोडाशीया वा तण्डुला, अपूपेभ्यो हितम् अपूप्यम् । अपूपीयम् ।

१४०—अपूपादि—अपूप । तण्डुल । अभ्यूष । अभ्योष । पृथुक । अभ्येष । अर्गल । मुसल । सूप । कटक । वर्णवेष्टक । किण्व ॥ अन्नविकारेभ्यश्च (२) ॥ पूप । स्थूणा । पीप । अश्व । पत्र । कट । अय स्थूण । ओदन । अवोप । प्रदीप । इत्यपूपादय ॥

११९–असमासे निष्कादिभ्य. ॥ अ० ५ । १ । २० ॥

असमस्तेभ्यो निष्कादिप्रातिपदिकेभ्य आर्हीयेष्वर्थेषु ठक् प्रत्ययो

---

(१) नाभये हितो नभ्योऽक्ष, नभ्यमञ्जनम् । यस्तु शरीरावयववाची नाभिशब्दस्तत शरीरावयवादिति यति कृते नाभये हित नाभ्य तैलमिति भवति । चकारस्यानुक्तसमुच्चयार्थत्वात् 'नस्तद्धित' (सू० ८६७) इति लोपो न भवति ॥

(२) अन्नविकारवाचिभ्यो यत् प्रत्ययो भवति । शष्कुलीभ्यो हित शष्कुल्यम्, सूप्यम्, ओदन्यम् ॥

भवति। निष्कं परिमाणमस्य तन्नैष्किकम्। असमासे किम्—परम-नैष्किकम्। अत्र टकारे भेदः।

१४१—निष्कादि—निष्क। पथ। पाद। माष। वाहद्रोण। षष्टि। इति निष्कादयः॥

१२०—गोद्व्यचोऽसङ्ख्यापरिमाणाश्वादेर्यत्॥ अ० ५। १। ३६॥

संख्यापरिमाणाश्वादिवर्जिताद् गोशब्दाद् द्व्यचश्च प्रातिपदिकाद् यत् प्रत्ययो भवति तस्य निमित्तं संयोगोत्पातावित्यर्थः। गोनिमित्ते संयोग उत्पातो वा गव्यः। द्व्यच्-धनस्य निमित्तं संयोग उत्पातो वा धन्यम्, स्वर्यम्, यशस्यम्, आयुष्यम्। संख्या-पञ्चानां निमित्तं पञ्चकम्। परिमाण-प्रास्थिकम्। अश्वादि-आश्विकम्। सर्वत्र यत् न भवति।

१४२—अश्वादि—अश्व। अश्मन्। गण। ऊर्णा। उमा। वसु। वर्ष। भङ्ग। इत्यश्वादयः॥

१२१—तद्धरति वहत्यावहति भाराद्वंशादिभ्यः॥ अ० ५। १। ५०॥

द्वितीयासमर्थाद् वंशादिभ्यः परस्माद् भारशब्दाद्धरत्यादिषु यथाविहितं प्रत्ययो भवति। वंशभारं हरति वहत्यावहति वा वांश-भारिकः, कौटजभारिकः। भारादिति किम्—वंशं हरति। वंशादिभ्य इति किम्—औहिभारं हरति, अत्र मा भूत्।

१४३—वंशादि—वंश। कुटज। वल्वज। मूल। अक्ष। स्थूणा। अश्मन्। अश्व। इक्षु। खट्वा। इति वंशादय॥

१२२—छेदादिभ्यो नित्यम्॥ अ० ५। १। ६४॥

द्वितीयासमर्थाच्छेदादिभ्यः प्रातिपदिकेभ्यो नित्यमर्हतीत्यर्थे यथाविहितं प्रत्ययो भवति। छेदनं नित्यमर्हति छैदिकः।

१४४—छेदादि—छद । भेद । द्रोह । दोह । वर्त । कर्ष । सप्रयोग । विप्रयोग । प्रेषण । सप्रश्न । विप्रकर्ष ॥ विराग विरज च ॥ वैरङ्गक । इति छदादय ॥

१२३—दण्डादिभ्यो य ॥ अ० ५ । १ । ६६ ॥

द्वितीयासमर्थदण्डादिप्रातिपदिकेभ्योऽर्हतीत्यर्थे य प्रत्ययो भवति । दण्डमर्हति दण्ड्य ।

१४५—दण्डादि—दण्ड । मुसल । मधुपर्क । कशा । अर्घ । मेधा । मेघ । युग । उदक । वध । गुहा । भाग । इभ । इति दण्डादय ॥

१२४—व्युष्टादिभ्योऽण् ॥ अ० ५ । १ । ६७ ॥

सप्तमीसमर्थव्युष्टादिप्रातिपदिकेभ्यो दीयते कार्यमित्येतयोरर्थयोरण् प्रत्ययो भवति । व्युष्टे दीयत कार्य वा वैयुष्टम् ।

१४६—व्युष्टादि—व्युष्ट । नित्य । निष्क्रमण । प्रवेशन । तीर्थ । सभ्रम । आतरण । समाम । सघात । अग्निपद । पीलुमूल । प्रवास । उपसक्रमण । दार्घ । उपवास । इति व्युष्टादय ॥

१२५—तस्मै प्रभवति सतापादिभ्यः ॥अ०५।१।१०१॥

चतुर्थीसमर्थसन्तापादिप्रातिपदिकेभ्य प्रभवतीत्यर्थे ठञ् प्रत्ययो भवति सन्तापाय प्रभवति सान्तापिक ।

१४७—सन्तापादि—सन्ताप । सनाह । सग्राम । सयोग । सपराय । सपेष । निष्पेष । निसर्ग । असर्ग । विसर्ग । उपसर्ग । उपवास । प्रवास । सघात । समोदन । सक्तु ॥ मासौदनाद्विगृहीतादपि ॥ मासौदनिक । मासिक । औदनिक ॥ निर्घोष । सर्ग । सपात । सवाद । सवेशन । इति संतापादय ॥

१२६—अनुप्रवचनादिभ्यश्छ ॥ अ० ५ । १ । १११ ॥

प्रथमासमानाधिकरणानुप्रवचनादिप्रातिपदिकेभ्यः प्रयोजनमिष्यं घ्यः प्रत्ययो भवति। अनुप्रवचनं प्रयोजनमस्य अनुप्रवाचनीयम्।

१४८—अनुप्रवचनादि—अनुप्रवचन। उत्थापन। प्रवेशन। अनुप्रवेशन। उपस्थापन। संवेशन। अनुवेशन। अनुवचन। अनुघाटन। अनुशासन। आरम्भण। आरोहण। प्ररोहण। अन्वारोहण। इत्यनुप्रवचनादय.।

१२७—पृथ्वादिभ्यः इमनिज्वा ॥ अ०५।१।१२२ ॥

षष्ठीसमर्थपृथ्वादिप्रातिपदिकेभ्यो भावेऽर्थे इमनिच् प्रत्ययो वा भवति। वा वचनमणादेः समवेशार्थम्। पृथोर्भावः प्रथिमा, पार्थवम्, पृथुत्वम्, पृथुता।

१४९—पृथ्वादि—पृथु। मृदु। महत्। पटु। तनु। लघु। यद्ध। साधु। वेणु। आशु। बहुल। गुरु। दृढ। चक्र। खण्ड। चण्ड। बाल। अकिंचन। हीड। पाक। वत्स। मन्द। स्वादु। हस्व। दीर्घे। प्रिय। वृष। ऋजु। क्षिप्र। क्षुद्र। इति पृथ्वादयः॥

१२८—वर्णदृढादिभ्यः ष्यञ् च ॥ अ० ५।१।१२३ ॥

वर्णविशेषवाचिभ्यो दृढादिभ्यश्च प्रातिपदिकेभ्यो भावे ष्यञ् चादिमनिच् प्रत्ययो भवति। शुक्लस्य भाव शौक्ल्यम्, शुक्लिमा, शुक्लत्वम्, शुक्लता। दार्ढ्यम्, दृढत्वम्, दृढता।

१५०—दृढादि—दृढ। परिवृढ। मृदु। कृश। चक्र। आम्र। लवण। ताम्र। अम्ल। शीत। उष्ण। जड। थविर। परिहर्व। मधुर। मूर्ख। मूक ॥ वेर्यावलाममतिमन'शाश्वानाम्॥ समो मतिमनसोर्जवने (१) धातु। वरण। मन्द। स्थिर। बहुल। दीर्घे। गूढ। आच्छ। इति दृढादयः॥

(१) वे परेभ्यो धात्वादिभ्यः ष्यञ्। वैर्याम्यम्, वैलाम्यम्, वैलक्ष्यम्, वैलक्षण्यम्, वैकारयम्। समः परस्मात् मतिमनोरन्यो वेर्धातोश्च ष्यञ्। साम्याम्यम्, साम्यनस्यम्॥

१२६—गुणवचनब्राह्मणादिभ्यः कर्मणि च ॥ अ० ५ ॥ १ । १२४ ॥

गुणवचनेभ्यो ब्राह्मणादिभ्यश्च प्रातिपदिकेभ्यो भावे कर्मणि चाभिधेये ष्यञ् प्रत्ययो भवति । जडस्य भाव कर्म वा जाड्यम्, ब्राह्मणस्य भाव कर्म वा ब्राह्मण्यम् ।

१५१—ब्राह्मणादि—ब्राह्मण । वाडव । माणव । चौर । मूक । आरात्रय । विराधय । अपराधय । उपराधय । एकभाव । द्विभाव । त्रिभाव । अन्यभाव । समस्थ । त्रिपमस्थ । परमस्थ । मध्यमस्थ । अनीश्वर । कुशल । कपि । चपल । अक्षेत्रज्ञ । निपुण ॥ अर्हतो नुम् च ॥ आर्हन्त्यम् । सत्रादिन् । सर्वेशिन् । बहुभाषिन् । वालिश । दुष्पुरुष । कापुरुष । दायाद । त्रिशसि । धूर्त । राजन् । सभापिन् । शीपपातिन् । अधिपात । अलस । पिशाच । पिशुन । विशाल । गणपति । धनपति । नरपति । गड्डुल । निज । निधान । विष ॥ सर्वेवेदादिभ्य स्वार्थं (१) ॥ चतुर्वेदस्योभयपदवृद्धिश्च ॥ चातुर्वैद्यम् । स्वभाव । निघातिन् । विघातिन् । राजपुरुष । विश्वस्ति । विज्ञाय । विज्ञात । विजात । नयात । सुहित । दान । विदग्ध । उचित । समग्र । शलीं । तत्पर । इदम्पर । यथातथा । पुरस् । पुन पुनर् । अभीक्ष्ण । तरतम । प्रकाम । यथाकाम । निष्कुल । स्वराज । महाराज । युवराज । सम्राज् । अविदूर । अपिशुन । अनृशस । अयथातथ । अयथापुर । स्वधर्म । अनुकूल । परिमण्डल । विश्वरूप । ऋत्विज । उदासीन । ईश्वर । प्रतिभू । साक्षि । मानुष । आस्तिक । नास्तिक । युगपत् । पूर्वापर । उत्तराधर । इति ब्राह्मणादय ॥

---

(१) सर्वे एव वेदा सार्ववेद्यम्, सार्वलोक्यम्, सार्वराज्यम्, सार्वगुण्यम् । आकृतिगणोऽयम् ॥

१५४—उद्गात्रादि—उद्गातृ। ब्रह्मेतृ। प्रतिहर्तृ। रथगणक। पत्तिगणक। पत्रिगणक। सुष्ठु। दुष्ठु। अध्वर्यु। वधू॥ सुभग मन्त्रे (१)॥ प्रशास्तृ। होतृ। पोतृ। कर्तृ। इत्युद्गात्रादयः॥

१३३—हायनान्तुयुवादिभ्योऽण्॥ अ०५।१।१३०॥

हायनान्तेभ्यो युवादिभ्यश्च षष्ठीसमर्थप्रातिपदिकेभ्यो भावकर्मणोरर्थयोरण् प्रत्ययो भवति। द्विहायनस्य भावः कर्म वा द्वैहायनम्, यूनो भावः कर्म वा यौवनम्।

१५५—युवादि—युवन्। स्थविर। होतृ। यजमान। कमण्डलु॥ पुरुषाऽसे (२)॥ सुहृत्। यातृ। श्रवण। कुक्षी। सुखी। सुहृदय। सुभ्रातृ। वृषल। दुभ्रातृ॥ हृदयाऽसे (३)॥ क्षेत्रज्ञ। कृतक। परिव्राजक। कुशल। चपल। निपुण। पिशुन। ब्रह्मचारिन्। कुतूहल। अनृशंस। भ्रातृ। कचुक। कन्दुक। दुःखी। दुर्हृदय। दुर्हृत्। मिथुन। कुलटा। महस्। कतक। किंवद। पोत। इति युवादयः॥

१३४—द्वन्द्वमनोज्ञादिभ्यश्च॥ अ० ५। १। १३३॥

द्वन्द्वसंज्ञकेभ्यो मनोज्ञादिभ्यश्च षष्ठीसमर्थप्रातिपदिकेभ्यो भावकर्मणोरर्थयोर्वुञ् प्रत्ययो भवति। गोपालपशुपालानां भावः कर्म वा गोपालपशुपालिका, शैक्योपाध्यायिका, मनोज्ञस्य भावः कर्म वा मानोज्ञकम्।

१५६—मनोज्ञादि—मनोज्ञ। कल्याण। प्रियरूप। छान्दस। छात्र। मेधाविन्। अभिरूप। आढ्य। कुलपुत्र। श्रोत्रिय। चोर। धूर्त। वैश्वदेव। युवन्। ग्रामपुत्र। ग्रामखण्ड। ग्रामकुमार। अमुष्य-

---

(१) सुभगस्य भावः सौभगो मन्त्र॥

(२) पुरुषस्य भाव कर्म पौरुषम्। सुपुरुषत्वमिति समासे॥

(३) हार्दम्। (द० ६।३।५०) समासे तु परमहृदयत्वमित्येव॥

पुत्र । अमुष्यकुल । शवपुत्र । कुशल । बहुल । अवश्य । अहीपुत्र । इति मनोज्ञादयः ।

१३५—तस्य पाकमूले पील्वादिकर्णादिभ्यः कुणञ्जाहचौ ॥ अ० ५ । २ । २४ ॥

पील्वादिभ्यः कर्णादिभ्यश्च षष्ठीसमर्थप्रातिपदिकेभ्यो यथासंख्यं पाकमूलयोरर्थयोः कुणञ्जाहचौ प्रत्ययौ भवतः । पील्वोः पाकः पील्वकुणः, कर्णस्य मूलं कर्णजाहम् ॥

१५७—पीलवादि—पील्व । कर्कन्धु । शमी । करीर । कुवल । बदर । अक्ष । खदिर । इति पील्वादयः ॥

१५८—कर्णादि—कर्ण । अक्षि । नख । मुख । मत्स । केश । पाद । गुल्फ । भ्रूभङ्ग । दन्त । ओष्ठ । पृष्ठ । अङ्गुष्ठ । इति कर्णादयः ।

१३६—तदस्य संजातं तारकादिभ्य इतच् ॥ अ० ५ । २ । ३६ ॥

प्रथमासमर्थेभ्यस्तारकादिप्रातिपदिकेभ्योऽस्येति षष्ठ्यर्थे इतच् प्रत्ययो भवति । तारकाः संजाता अस्य तारकितं नभः । पुष्पितो वृक्षः संजातमहणपदृतिविशेषणम् ॥

१५९—तारकादि—तारका । पुष्प । मुकुल । कण्टक । पिपासा । मुख । दुःख । ओजोष । कलुष । सूचक । रोग । विचार । व्याधि । निष्फल । मूल । पुरीष । किण्वलय । कुसुम । प्रचार । वन्द्रा । वेग । पुष्पा । भद्रा । कलकण्ठ । मद द्रोह ॥ गर्भदर्शनी (१) ॥ फल । तलाट । तिलक । पल्वल । खण्ड । धेनुष्या । अघ । अङ्गारक । अङ्गार । वार्तक । पुलक । कुवलय । रोमन्थ । गर्व । तरङ्ग । कल्लोल । पत्रङ्ग ।

(१) गर्भिणा; पाठः । अनार्गणीनिर्देशात् 'दर्भिणी मार्गा' इत्येवमुचितं प्रतिभाति ॥

चन्द्र । स्रक । मुद्रा । राग । हस्त । कर । सीमन्त । कर्दम । कल्क । कलङ्क । कुतूहल । कन्दल । आन्दोल । अन्धकार । कोरक । अङ्कुर । रोमाञ्च । हर्ष । उत्कर्ष । क्षुधा । ज्वर । गोर । दोह । शास्त्र । मुकुर । तिलक । बुभुक्षा । निद्रा । तारकादिराकृतिगणः । इति तारकादयः ॥

१३७—विमुक्तादिभ्योऽण् ॥ अ० ५ । २ । ६१ ॥

अध्यायानुवाकयोरभिधेययोर्विमुक्तादिप्रातिपदिकेभ्यो मत्वर्थेऽण् प्रत्ययो भवति । विमुक्तं वर्त्ततेऽस्मिन् स वैमुक्तोध्यायोऽनुवाको वा, दैवासुरः ॥

१६०—विमुक्तादि—विमुक्त । देवासुर । वसुमत् । सत्वत् । उपसत् । दशार्हपयस् । हविर्धान । मित्री । सोमापूषन् । अमाविष्णू । वृत्रहति । इडा । रक्षोऽसुर । सदसत् । परिषादक् । वसु । मरुत्वत् । पत्नीवत् । महीयल । मत्वत् (१) ॥ दशार्ह । वयस् । पतत्रि । सोम । महिन्नी । हेतु । अरयहत्य । दशार्ण । उर्वशी । सुपर्ण । इति विमुक्तादयः ।

१३८—गोपदादिभ्यो वुन् ॥ अ० ५ । २ । ६२ ॥

अध्यायानुवाकयोरभिधेययोर्गोपदादिप्रातिपदिकेभ्यो मत्वर्थे वुन् प्रत्ययो भवति । गोपदशब्दोऽस्मिन्नस्ति गोपदकोऽध्यायोऽनुवाको वा, इषेत्वकः ।

१६१—गोपदादि—गोपद् । इषेत्वा । मातरिश्वन् । देवस्यत्वा । देवीरापः । कृष्णोऽस्याखरेष्टः । दैवीधियम् । रक्षोहण । अश्वन । प्रभूत । प्रतूर्त । दृशान । युञ्जान । सहस्रशीर्षा । वाचस्पते । कृशास्व । स्वाहाग्ने । प्रसुस्त । इति गोपदादयः ॥

---

(१) सत्वदिति शब्दोऽस्मिन् गणे द्विरार्धं पठ्यते । यद्येकस्तालग्रन्थिभेदस्तदा तु युक्तमन्यथा त्रामादिकः पाठः । एवं 'दशार्हपयस्' अपि ।

१३९–आकर्षादिभ्यः कन् ॥ अ० ५ । २ । ८४ ॥

आकर्षादिभ्यः सप्तमीसमर्थप्रातिपदिकेभ्यः क्षुद्राल्प इत्यर्थे कन् प्रत्ययो भवति । आकर्षे क्षुद्राल आकर्षकः ।

१६२—आकर्षादि—आकर्ष । रज्जु । पिपासा । पिचण्ड । अशनि । अश्मन् । निचय । चय । जय । आचय । अय । नय । निवाद । गद्गद । दीप । हद । ह्राद । ह्राद । मस्तुनि । पिशाच । पिण्ड । इत्याकर्षादयः ॥

१४०–इष्टादिभ्यश्च ॥ अ० ५ । २ । ८८ ॥

इष्टादिभ्यः प्रातिपदिकेभ्योऽनेनेत्यस्मिन्नर्थे इनिः प्रत्ययो भवति । इष्टमनेन इष्टी यज्ञे, पूर्ती श्राद्धे ।

१६३—इष्टादि—इष्ट । पूर्त । उपमादित । निगदित । परिचादित । निकथित । परिकथित । संकलित । निपठित । संकल्पित । अनर्पित । विकलित । संगलित । निपलित । पठित । परिकलित । संचर्चित । अर्चित । परिचर्चित । पूजित । परिगणित । उपगणित । अवकीर्ण । परिघ । आयुक्त । आम्नात । श्रुत । अधीत । असेवित । अपराद्ध । अवकल्पित । निराकृत । उपकृत । उपाकृत । अनुयुक्त । उपनत । अनुगुपित । अनुपस्थित । व्याकुलित । निगृहीत । अवधारित । अपचित । इष्टादयः ॥

१४१–रसादिभ्यश्च ॥ अ० ५ । २ । ९५ ॥

१४२–सिध्मादिभ्यश्च ॥ अ० ५ । २ । ९७ ॥

सिध्मादिप्रतिपदिकेभ्यो मत्वर्थे विकल्पेन लच् प्रत्ययो भवति। सिध्मोऽस्यास्तीति सिध्मलः, सिध्मवान् । अत्र पक्षे मतुर्विधीयते मत्वत इनिठनौ ।

१६५—सिध्मादि—सिध्म । गडु । मणि । नाभि । जीव । निष्पाव । पांसु । सक्तु । हनु । मांस । परशु ॥ पार्ष्णिघमन्योर्दीर्घश्च ॥ पार्ष्णीलः । घमनीलः । पर्ण । उदक । प्रज्ञा । मण्ड । पार्श्व । गण्ड । ग्रन्थि ॥ वातदन्तबललाटगलानामूङ् च ॥ वातूलः । दन्तूलः । बल्लूलः । ललाटूलः । मल्लूलः ॥ जटाघटाकालाः क्षेपे ॥ जटालः । घटालः । कालालः । सक्थि । कर्ण । स्नेह । शीत । श्याम । पिङ्ग । पित्त । शुष्क । पृथु । मृदु । मञ्जु । पत्र । चटु । कपि । कण्डु । संज्ञा ॥ क्षुद्रजन्तूपतापाच्चेष्यते ॥ क्षुद्रजन्तुः, यूकालः मक्षिकालः; उपताप-विचर्चिकालः, विषादिकालः, मूर्च्छालः । इति सिध्मादयः ॥

१४३–लोमादिपामादिपिच्छादिभ्यः शनेलचः ॥अ०५। २ । १०० ॥

लोमादिभ्यः पामादिभ्यः पिच्छादिभ्यश्च प्रातिपदिकेभ्यो मत्वर्थे यथासंख्यं श, न, इलच् इत्येते प्रत्यया भवन्ति । लोमान्यस्य सन्तीति लोमशः, लोमवान् । पाम विद्यतेऽस्य स पामनः, पामवान् । पिच्छ-मस्यास्तीति पिच्छलः, पिच्छवान् ।

१६६—लोमादि—लोमन् । रोमन् । वल्गु । बभ्रु । हरि । कपि । मुनि । वरु । इति लोमादयः ॥

१६७—पामादि—पामन् । वामन् । हेमन् । श्लेष्मन् । कद्रु । बलि । श्रेष्ठ । पलल । सामन् ॥ अङ्गात्कल्याणे ॥ शाकीपलालीदद्रूवां

मतुप् भवति न तु 'अत इनिठनौ' स्ववान् स्वान् ॥

ह्रस्वत्वं च ॥ विष्वगित्युत्तरपदलोपश्चाकृतसन्धे ॥ लक्ष्म्या अत्र (१) ॥ इति पामादयः ॥

१६८—पिच्छादि—पिच्छ । तरस् । घुवका । क्षुवका ॥ ज्ञानघटाकालात् क्षेपे (२) ॥ वर्ण । चदक । पङ्क । मक्षा । इति पिच्छादयः ॥

१४४—श्रीह्यादिभ्यश्च ॥ अ० ५ । २ । ११६ ॥

प्रथमासमानाधिकरणश्रीह्यादिप्रातिपदिकेभ्यो मत्वर्थे इनिठनौ प्रत्ययौ भवतः । श्रीह्योऽस्य सन्तीति श्रीही, श्रीहिकः, श्रीहिमान् ।

१६९—श्रीह्यादि—श्रीहि । माया । शिखा । मेखला । मंक्षा । शलाका । माला । वीणा । वटवा । अष्टका । पताका । कर्मन् । हंसा (३) । यवयव । कुमारी । नौ (४) ॥ शीर्षान्नञ् ॥ अशीर्षी, आशीर्षिका । इति श्रीह्यादयः ॥

१४५—तुन्दादिभ्य इलच ॥ अ० ५ । २ । ११७ ॥

तुन्दादिप्रातिपदिकेभ्यो मत्वर्थे इलचकारादिनिठनौ मतुप् च प्रत्यया भवन्ति । तुन्दोऽस्यास्तीति तुन्दिलः, तुन्दी, तुन्दिकः, तुन्दवान् ।

१७०—तुन्दादि—तुन्द । उदर । पिचण्ड । घट । यव । श्रीहि ॥ स्वाङ्गाद् विशदौ च (५) ॥ इति तुन्दादयः ॥

---

(१) अत्र मकारात् कपाले नः प्राप्यः । कपालकरमर्द्ध श्रीरसस्या इत्या अङ्गना । माक्षिन, पक्षालिन, दनुजः । 'विष्-अच्' इत्यवस्थायां च. प्रापवस्त्रैलोक्यपदस्थाम् मागधप्रयोगः । विश्वगस्यास्तीति विष्वञ्चः । क्ष्मी अस्यास्तीति क्ष्मणः ।

(२) क्षुद्रशिला अत्र आस्य सन्तीति अटिच् । क्षुद्रं घटिका, काटिकः ॥

(३) शिखादिभ्य इनिर्वेदपठे न तु टच् ॥

(४) यवयवादिभ्यष्टगेवेदपठे दीर्घाभावश्च ॥

(५) विशेषनुबाधिमूलात् स्वाङ्गादेवः प्रत्ययादिकादिकच् । दीर्घ

१४६—अर्शआदिभ्योऽच् ॥ अ० ५ । २ । १२७ ॥

अर्शआदिप्रातिपदिकेभ्यो मत्वर्थेऽच् प्रत्ययो भवति । अर्शांस्यस्य विद्यन्ते स, अर्शसः ।

१७१—अशआदि—अर्शस् । उरस् । तुन्द । चतुर । पलित । जटा । घटा । अभ्र । कर्दम । आम । लवण ॥ स्वाङ्गाद्धीनात् (१) ॥ आकृतिगणोऽयम् । इत्यर्शआद्यः ॥

१४७—सुखादिभ्यश्च ॥ अ० ५ । २ । १३१ ॥

सुखादिप्रातिपदिकेभ्यो मत्वर्थे इनिः प्रत्ययो भवति । मतुबादीनामपवादः । सुखमस्यास्तीति सुखी, दुःखी ।

१७२—सुखादि—सुख । दुःख । तृष्ण । कृच्छ्र । आम । अलीक । करुणा । कृपण । सोढ । प्रमीप । शील । हल ॥ माला क्षेपे (२) ॥ अण्य । इति सुखादयः ॥

१४८—पुष्करादिभ्यो देशे ॥ अ० ५ । २ । १३५ ॥

पुष्करादिप्रातिपदिकेभ्यो मत्वर्थे देशेऽभिधेये इनिः प्रत्ययो भवति । पुष्करोऽस्मिन्निति पुष्करी देशः, पद्मी वा । देशे इति किम्—पुष्करवान् हस्ती ।

१७३—पुष्करादि—पुष्कर । पद्म । उत्पल । तमाल । कुमुद । नड । कपित्थ । बिस । मृणाल । कर्दम । शाल्मलि । विगर्ह । करीष ।

नासिकाऽस्यास्तीति नासिक्यः, लम्बौ कर्णौ यस्य स कर्णिलः, औष्ठिलः ।

(१) हीनशब्दात्परस्मात् स्वाङ्गादजेश् स्याच्च तु मत्वर्थादिः अक्षिभ्यां हीनो हीनाक्षः । हीनहस्तः । हीनबाहवः । वर्णादित श्वेतादेर्ब्राह्मणं भवकारादेः । श्वेतो वर्णोऽस्यास्तीति श्वेतः, नील, काल, पीत, हरितः, इत्यादि ॥

(२) कुत्सिता माऽस्यास्तीति माली । मधुर् मा भूत् ॥

।शरीष । यवास । प्रवास । हिरण्य । कैरव । कल्लोल । तरङ्ग । वयस । इति पुष्करादयः ॥

१४९—बलादिभ्यो मतुवन्यतरस्याम् ॥अ०५।२।१३६॥

बलादिप्रातिपदिकेभ्यो मत्वर्थे विकल्पेन मतुप्, पक्ष इनिः, ठक्, तु न भवति । बलमस्यास्तीति बलवान्, बली ।

१४७—बलादि—बल । उत्साह । उद्भाव । उद्भास । उद्धाम । सिद्धामल । मूलमूल । दश । कुल । आयाम । व्यायाम । उपयाम । आरोह । अवरोह । परिणाह । युद्ध । इति बलादयः ॥

१५०—देवपथादिभ्यश्च ॥ अ० ५ । ३ । १०० ॥

देवपथादिप्रातिपदिकेभ्यो ऽवार्थे प्रतिकृतौ संज्ञायां च विहितस्य कन्प्रत्ययस्य लुप् भवति । देवपथस्येव प्रतिकृतिः, देवपथ', हंसपथः ।

१७५—देवपथादि—देवपथ । हंसपथ । वारिपथ । जलपथ । राजपथ । शवपथ । सिंहगति । यष्टिमीना । चामरज्जु । रज्जु । हस्त । इन्द्र । दण्ड । पुष्प । मलय । वयपथ । शङ्कुपथ । सिंहपथ । आकृतिगणोऽयम् । इति देवपथादयः ॥

१५१—शालादिभ्यो यत् ॥ अ० ५ । ३ । १०३ ॥

शालादिप्रातिपदिकेभ्यो ऽवार्थे यत् प्रत्ययो भवति । शालेव शाल्यः, मुख्यः ।

१७६—शालादि—शाला । मुख । जघन । शृङ्ग । मेघ । वर्ण । स्कन्ध । शिरस् । उरस् । अम । शरण । इति शालादयः ॥

१५२—शर्करादिभ्योऽण् ॥ अ० ५ । ३ । १०७ ॥

